## मये च। (१३८/३४८४)

[1]सोमग्रहणं, यश्चानुवर्तते। मय इति मयडर्थो लक्ष्यते। सोमशब्दान् [2]मयडर्थे यः प्रत्ययो भवति। आगतविकारावयवप्रकृता मयडर्थाः। 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः' (४.३.८१/१४६१) 'मयट् च' (४.३.८२/१४६२), 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः' (४.३.१४३/१५२३), 'तत्प्रकृतवचने मयट्' (५.४.२१/२०८९) इति। तत्र [3]यथायोगं समर्थविभक्तिः। 'पिबाति सोम्यं मधु' (ऋ. ८.२४.१३)। सोममयम् इत्यर्थः॥

## मधोः। (१३९/३४८५)

यशब्दो निवृत्तः। मधुशब्दान्मयडर्थे यत्प्रत्ययो भवति। मधव्यान् [4]स्तोकान् (पं. १.८८.२)। मधुमयान् इत्यर्थः॥

## वसोः समूहे च। (१४०/३४८६)

वसुशब्दात् समूहे वाच्ये यत् प्रत्ययो भवति, चकारान्मयडर्थे च। यथायोगं समर्थविभक्तिः। वसव्यः समूहः। मयडर्थो वा।

[४९३] अक्षरसमूहे छन्दसः [5]स्वार्थ उपसङ्ख्यानम्। (म.भा. २.३३५)

'[6]ओ श्रावय इति चतुरक्षरम्। अस्तु [7]श्रौषट् इति चतुरक्षरम्। यज इति द्व्यक्षरम्। 'ये यजामहे इति पञ्चाक्षरम्। द्व्यक्षरो वषट्कारः। [8]एष वै [9]सप्तदशाक्षरश्छन्दस्यः प्रजापतिर्[10]यज्ञो मन्त्रे विहितः (मै.सं. १.४.११)। सप्तदशाक्षराण्येव [11]छन्दस्यः इत्यर्थः। छन्दःशब्दादक्षरसमूहे वर्तमानात् [12]स्वार्थे [13]यत् प्रत्ययः।

[४९४] वसुशब्दादपि [14]यद् वक्तव्यः। (म.भा. २.३३५)

'हस्तौ [15]पृणस्व बहुभिर्वसव्यैः' (तै.सं. १.२.१३.२)। वसुभिः इत्यर्थः। '[16]अग्निरीशे वसव्यस्य' (ऋ. ४.५५.८)। [17]वसोः इत्यर्थः॥

## नक्षत्राद् घः। (१४१/३४८७)

नक्षत्रशब्दाद् घः प्रत्ययो भवति स्वार्थे। समूहे इति नानुवर्तते। 'नक्षत्रियेभ्यः स्वाहा' (वा.सं. १२.२८)॥

## सर्वदेवात् तातिल्। (१४२/३४८८)

सर्वदेवशब्दाभ्यां तातिल् प्रत्ययो भवति छन्दसि [18]विषये स्वार्थिकः। 'सर्वतातिम्' (ऋ. १०.३६.१४)। 'देवतातिम्' (ऋ. ३.१९.२)॥

---

1. सोमप्रत्ययश्चानुवर्तते ई.ह, यत्प्रत्ययश्च क. 2. मयार्थे ब. 3. यथायथं ड. 4. स्तोकान् मधुमयान् इत्यर्थः नास्ति फ.ज. 5. स्वार्थे नास्ति फ, स्वरार्थे ज. 6. आश्रावय ब.फ.इ. (तै. 1.6.11.1) 7. वौषट् ड.ह, नास्ति ब. 8. एष वै प्रजापतिः सप्तदशो यज्ञेऽन्वायत्तौ (मै.सं. 1.4.11) 9. सप्तदशाक्षरः नास्ति ब.क. 10. यज्ञमनु ब.ड.ई.ह, यज्ञमन्त्रे क. 11. एतानि ड. 12. स्वरार्थे ज. 13. यत् नास्ति फ, प्रत्ययो भवति फ. 14. स्वार्थे यः प्रत्ययः भवति ड.फ.ह. 15. गृहीतस्य मुद्रितः पाठः, वृणस्व ब, गृहस्य क, प्रणस्व ह, वृणीष्व ड. 16. उदाहरणमिदं नास्ति ब. ई, अग्निविशेषे वसव्यः वसवः इ. 17. वसुनः ज.ह. 18. विषये नास्ति, स्वार्थे ड.इ.